# संस्कृत-वार्ता:

दिनाङ्क :- 08.06.2025 प्रात: - 06:55

पीएम-सीडीआरआई

प्रधानमन्त्री नरेन्द्रमोदी अद्य आफ्रिकासङ्घस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आपद अवरोधिमूलसंरचनासम्मेलने भागग्रहणे प्रसन्नतां प्रकटितवान्। सीडीआरआइ इति सङ्घं आभासीय-माध्यमेन सम्बोधयता प्रधानमन्त्रिणा कार्याचरण-कार्यक्रमाणां परिकल्पना, विकासशील-राष्ट्रेभ्यः वित्तोपलब्धता च भवतु इति सुनिश्चयं कर्तुं सबलं स्वविचाराः प्रचटिताः।

श्रीमोदिना आशा प्रकटिता यत् अस्मिन् सम्मेलने चर्चायां विभिन्नेषु विषयेषु विचारः भविष्यतीति । प्रधानमन्त्रिणा मोदिना फ्रांसदेशस्य राष्ट्रपतेः इमैनुएल मैक्रों इत्यस्य समर्थन-प्रदाने, तस्मै धन्यवादाः प्रदत्ताः। एतत् सम्मेलनं प्रथमवारं फ्रान्सदेशे आयोजितम्।

------------------------------------------

पीएम मोदी

पीएम मोदी ब्रिटेनस्य विदेशसचिवेन डेविड लैमि इत्यनेन सह मिलित्वा रणनीतिगतसम्बन्धेषु प्रगतेः प्रशंसाम् अकरोत्। प्रधानमन्त्री नरेन्द्रमोदी नवीदिल्ल्यां ब्रिटेनस्य विदेशसचिवेन डेविड् लैम्मी इत्यनेन सह मिलितवान्। सामाजिकजनसन्चार-माध्यमेषु एकस्मिन् पटलमध्ये मोदीमहोदयः भारत-यूके-व्यापक-रणनीतिगत-प्रगतेः कृते स्वस्य योगदानस्य प्रशंसाम् अकरोत्। यत् सद्यः एव सम्पन्नेन मुक्तव्यापार-संधिपत्रेण सम्बन्धः अधिक: सुदृढ: जात:।

------------------------------------------

जयशङ्करः

विदेशमन्त्री डा. एस्. जयशङ्करः भारत-युनैटेड् किङ्गडम् इत्येतयोर्मध्ये सद्यस्सम्पन्नं मुक्तवाणिज्यिकसमन्वयेन सह द्विपक्षीय-योगदान-सम्मेलनञ्च महत्त्वपूर्णम् इति उक्तवान। नवदेहल्यां यू. के. विदेशसचिवेन डेविड् लैमी इत्यनेन सह मिलित्वा डा. जयशङ्करः अवदत् यत्

सन्धिः न केवलं द्विमार्गीयव्यापारं निवेशञ्च प्रवर्धयिष्यति अपितु उभय-राष्ट्रयोर्मध्ये द्विपाक्षिकसम्बन्धैस्सह अन्येषु सामरिक-पक्षेष्वपि सकारात्मकप्रभावं जनयिष्यतीति। सः अवदत् यत् आपूर्ति-मूल्यशृङ्खलानां सुदृढीकरणेऽपि अस्य योगदानं भविष्यतीति। डॉ. जयशङ्करः पहलगाम् इत्यत्र आतंङ्कआक्रमणस्य दृढ-निन्दायै, आतङ्कवादं विरुध्य कृते युद्धे च भारतस्य समर्थनाय यू. के. सर्वकारं प्रति साधुवादान् प्रेषितवान्। सः अवदत् यत् भारतं आतङ्कवादं विरुध्य शून्य-सहिष्णुतायाः नीतिं आचरति, सहभागिनश्च तदवगच्छन्त्विति अपेक्षते।

------------------------------------------

**प्रधानमन्त्री/राजनाथ सिंह:**

प्रधानमन्त्रिणा उक्तम् यत् भारते कस्यापि आक्रमणस्य समुचितं उत्तरं प्रदास्यते, आतङ्कवादिनः तेषां स्वामिनः च मध्ये कोपि भेदः न भविष्यति इति रक्षामन्त्रिणा: राजनाथसिंहस्य लेखं मोदी अवदत्। यत्र सीमपारे-आतङ्कवादं प्रति भारतस्य शून्यसहिष्णुतायाः नीतिः स्पष्टा अस्ति। रक्षामन्त्री स्वलेखे उक्तवान् यत् वार्ता आतङ्कवादः च संगन्तुम् न शक्नुतः।

------------------------------------------

**अमित शाह:/मदुरई**

केन्द्रीय-गृह मन्त्री अमित शाह: अद्य तमिलनाडो: मदुरई इत्यत्र भाजपा दलस्य राज्य-कोर-समितेरूपवेशनस्य अध्यक्षतां करिष्यति। अपि च दलस्य राज्य-जनपद-मंडल-स्तरीयै: पदाधिकारिभि: सह वार्तां करिष्यति। उपवेशने आगामिने विधानसभा-निर्वाचनाय दलीय रूपरेखा सज्जिता भविष्यति। शाह: एतिहासिके मीनाक्षी अम्मन मन्दिरे दर्शनमपि करिष्यति।

------------------------------------------

**कर्नाटक**

कर्नाटकस्य मुख्यमन्त्री सिद्धारमैया गतबुधवासरे बेगलूरो: चिन्नास्वामि प्राङ्गणे सम्मर्दने हतानाम् एकादश जनानां परिजनेभ्य: सहाय्य राशे: पञ्चविंशति- पञ्चविंशति लक्ष-प्रशासनेन घोषणा कृता। इत: प्राक् प्रतिपरिजनं दश-दश-लक्ष रूप्यकाणां सहाय्यं प्रदातुं घोषणा कृता।

------------------------------------------

## दिल्ली/आरक्षि

दिल्ली- आरक्षि- दलेन शनिवासरे ६६ षट् षष्टिः  बाङ्गलादेशीयाः नागरिका: निगृहीता:। एते कतिपयवर्षै: नगरे अवैधरूपेण निवसन्ति स्म इति अधिकारिणः अवदन्। तेषां समीपे वैधपत्राणामभावः आसीत्।

------------------------------------------

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

------------------------------------------

## टेनिस फ्रेंच ओपन

फ्रेंच-ओपन टेनिस स्पर्धाश्रृङ्खालायाम् अमरीकाया: कोको गौफ: महिलैकल स्पर्धायां पुरस्कृता। अपरत्र अद्य पुरूषैकलस्पर्धायाम् जैनिक सिनर: कार्लोस् अल्काराज: च सम्मुखीकरिष्यति:।

।। इति वार्ता:।।